श्रीमद्विठ्ठलनाथनाम जगदुद्धारैकहेतुपर:।
राधाभावविभाव-भावनरत: श्रीवल्लभस्यात्मज: ।।
तातोद्दिष्टपथप्रचारचतुर: साक्षाद्दयामूर्तिमान्
तज्जन्मोत्सवशालिसर्वहृदये निष्ठां दृढां भावय ।।

दि. ०४/०१/२०१६

गृहस्थकर्तव्य

- अविहिता सेवा
  - शरणागति
  - समर्पणानुभावरूपा सेवा
- पूजा(विहिता)
  - सेवांगभूता (कृताकृत)
  - स्वतंत्रा अवश्यकर्तव्यरूपा
- तीर्थपर्यटन
  - अनुकल्प
  - विकल्प
    - जीवननिर्वाह-उपयोगी भिक्षानुमति
    - भिक्षासु जीवननिर्वाह निषेध
- कथा
  - श्रवण
  - कीर्तन
  - स्मरण

जघन्याधिकारी (जामनगरके हरिरायजीको पक्ष)

- जघन्याधिकारी
  - लोकार्थी
    - वित्तार्थी
    - वृत्त्यर्थी
  - देवलक
    - लाभपूजार्थी

दि. ०६/०१/२०१६

- अपवाद
  - देश
  - काल
  - क्रिया
  - मन्त्र
  - कर्ता
  - द्रव्य
  - शास्त्र

दि. ०७/०१/२०१६

- कर्म
  - अनुष्ठान
    - नित्य (सेवा)
    - नैमित्तिक (सेवा)
    - काम्य (सेवा)
    - प्रायश्चित्त (सेवा)
  - त्याग
    - काम्यकर्म
      - सानुभाव
      - मानसी
    - दोषवत्कर्म
      - अहंता–ममता अविनियोगरूप दोषवत् सेवाको त्याग (तादात्म्यप्रयोजना)
      - विवेक–धैर्य–आश्रय रहित सेवाको त्याग
      - विक्षेपादि सहित सेवाको त्याग
      - अस्ववृत्त्या अनुष्ठीयमाना सेवाको त्याग
      - अस्व–गेहीया सेवाको त्याग
      - अस्व–स्वरूपासक्ति प्रयुक्त सेवाको त्याग
    - यज्ञदानतप: (आरंभिक दोषन्को अन्तमें त्याग)

दि. ०९/०१/२०१६

- यज्ञात्मक
  - द्रव्ययज्ञ
    - आत्माग्नौ
      - इन्द्रियार्थाहुति
      - इन्द्रियव्यापाराहुति
      - आत्मेन्द्रियाग्नौ इन्द्रियार्थाहुति
    - दैवाग्नौ
      - सकाम द्रव्याहुति
      - निष्काम द्रव्याहुति
    - ब्रह्माग्नौ
      - द्रव्याहुति
      - द्रव्यात्मक यज्ञाहुति
  - ज्ञानयज्ञ
    - स्वाध्यायाग्नौ ब्रह्मचर्यात्माहुति
    - संयमाग्नौ गृहस्थात्माहुति
    - तपोरूपाग्नौ वानप्रस्थात्माहुति
    - ज्ञानाग्नौ संन्यस्तात्माहुति
      - केवल तादात्म्य ज्ञानाग्नौ ज्ञानमार्गीयात्माहुति
      - माहात्म्यज्ञानपूर्वक सुदृढ सर्वतोधिक स्नेहाग्नौ भक्तात्माहुति

यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः = अन्यथा सर्वदोषाणां न निवृत्तिः कथञ्चन

भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् = असमर्पितवस्तूनां तस्मात् वर्जनमाचरेत्

यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् = सेवकानां यथा लोके व्यवहारः प्रसिद्धयति

तथा कार्यं समर्प्यैव सर्वेषां ब्रह्मता ततः

# सेवाकी भक्तिरूपताके अंग

१. माहात्म्यज्ञानमूलकसुदृढसर्वतोधिक स्नेह

२. काल-(अनियम)

३. परिमाण-(अनियम)

४. देश-(अनियम)

५. द्रव्य-(अनियम)

६. स्वसर्वस्वसमर्पण

७. समर्पितविनियोग तत्सुखविचारपूर्वक

८. तत्सुखविचार

९. व्रजभक्तभावभावनोपेत

१०. भगवत्स्वरूपकी भागवतार्थलीलाकर्तापनो

११. अदम्भेन अप्रदर्शनात्मिका

१२. अनवसरमें श्रवण-कीर्तन-स्मरणादि

१३. मार्यादिक पूजा

१४. तीर्थाटनादि

१५. परिचर्या

१६. शरणागति लीलाभावना

} अनुकल्पतया (१३–१६)

दि. १२/०१/२०१६


क्रियाशक्ति
ज्ञानशक्ति
आत्मरति (अविद्या + विद्या ..)
जीवात्मा
(सत् + असत् )क्रिया
(सन् + असन्) मति
(विषय + भगवद्) आसक्ति
बद्धता
दैवी
मुक्तता
प्रवाही
मोक्षोपमबद्धता
बन्धोपममुक्तता
मुक्तात्मा
प्रवृत्तिधर्म
निवृत्तिधर्म
त्रैवर्गिकपुरुषार्थ
ज्ञानमार्ग
भक्तिमार्ग

दि. १२/०१/२०१६

# धर्मानुष्ठानके लिये

- गृहावस्थान
  - त्रैवर्गिक प्रवृत्तिधर्मार्थ
  - त्रैवर्गिक निवृत्तिधर्मार्थ
    - नवधा भक्त्यर्थ
    - तदुपेत साक्षात् वा परंपरया अहंममास्पद विनियोगार्थ
- गृहत्याग निवृत्तिधर्मार्थ
  - कर्ममार्ग चित्तशुद्ध्यर्थ
  - भक्तिव्यसन भगवल्लीलाके निर्बाध अनुसंधानार्थ
- त्यागार्थग्रहण
  - औषधवत्
  - बुद्धिभेद अजननार्थ

दि. १३/०१/२०१६

# आत्मनिवेदनोत्तर इतिकर्तव्यता

१) श्रद्धा = श्रवणादर

२) अनुकीर्तन = भगवत्कथाव्याख्यान

३) परिनिष्ठा = षोडशोपचारपूजा

४) स्तोत्रादिना स्तुतिः

५) परिचर्या = मन्दिरमार्जनादिक्रिया

६) सर्वांगाभिवन्दन = दंडवत्प्रणाम

७) भगवद्भक्तपूजा अभ्यधिका = (आधुनिक पुष्टिमार्गमें अप्रासंगिक)

८) सर्वभूतोमें भगवन्मति = (आधुनिक पुष्टिमार्गमें अप्रासंगिक)

९) भगवदर्थ अंगचेष्टा = भगवदाराधानौपायिक तुलसीपुष्पावचयनादि

१०) वचसा भगवद्गुणेरण

११) भगवदर्थ अर्थपरित्यागः=

१२) भोग और सुख को परित्याग

१३–१८) इष्टं, दत्तं, हुतं, जप्तं, व्रतं, तपः (भाग.पुरा.११।१९।२०–२३)

पुष्टि अस्मिता कालिन्दीको कलिकलंकसे दूर ही रखना।
अपनी प्रीतिकी सरसिजरीति धनविक्रयसे दूर ही रखना।।

प्रभुके भक्ति मनोरथ और प्रसाद बजारमें पसराये।
खरीददार कई आये पर पुष्टिभक्त ना आ पाये।
अपने वल्लभकी वाणीको  जगवंचनसे दूर ही रखना।।
पुष्टिअस्मिता...

निःसाधनके साधन बन कर फल जब खुद ही मिल जाये।
तब क्यों दुष्ट साधनोंमे हम अपने मनको उलझायें?
हों यदि विट्ठल! वंश तुम्हारे जघन्य कृत्य से दूर ही रखना।
पुष्टि अस्मिता...

पंचशती पंचांगप्रणति कर पंचाक्षरदृढ भाव बने।
गिरि-यमुना-प्रभु-महाप्रभु-प्रभुचरणोंमें मन सदा सने।।
पुष्टिमार्गको लोक-अर्थिताके सिद्धांत से दूर ही रखना।।
पुष्टि अस्मिता...

# ग्रंथ संदर्भ

न धर्मं ख्यापयेद् विद्वान् … त्रिवर्गसेवी सततं देवतानां च पूजनं
कुर्याद् अहरहर्नित्यं नमस्येत् प्रयत: सुरान् विभागशील: सततं
क्षमायुक्तो दयायुक्तो गृहस्थस्तु समाख्यात: न गृहेण गृही भवेत्

(कूर्म.पुराण.२।१५।१।२६)

स वा एष महानजआत्मा योयं विज्ञानमय: प्राणेषु य अन्तर्हृदयआकाश: तस्मिन् शेते सर्वस्य वशी… स न साधुना कर्मणा भूयान् नो असाधुना कनीयान् एव सर्वेश्वर: … एष सेतु: विधरण एषां लोकानाम् असम्भेदाय तमेनं वेदानुवचनेन ब्राह्मण विविदिषन्ति यज्ञेन दानेन तपसा अनाशकेन. एतमेव विदित्वा मुर्निभवति. एतमेव प्रव्राजिनो लोकम् इच्छन्त: प्रव्रजन्ति. एतद्ध स्म वा एतत् पूर्वे विद्वांस: प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नो अयमात्मा अयं लोक: इति ते ह पुत्रैषणायाश्च वितैषणायाश्च लोकेषणायाश्च व्युत्थाय अथ भिक्षाचर्यं चरन्ति. या ह्येव पुत्रैषणा सा वित्तैष्णा या वित्तैषणा सा लोकैषणा. उभे ह्येते एषणेएव भवत:. स एष नेति नेति आत्मा अगृह्यो न गृह्यते अशीर्यो न शीर्यते असंगो न सज्यते. नैनं कृताकृते तपत: … ब्रह्माभयं हि वै भवति.

(छान्दोग्योपनिषद् ४।४।२२-२५)

पादेषु सर्वभूतानि पुंस: स्थितिपदो विदु:। अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु।।
पादास्त्रयो बहिश्चासन् अप्रजानां य आश्रमा:। अन्तस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रत:।।
सृति विचक्रमे विश्वङ् साशनानशने उभे। यदविद्या च विद्या च पुरुषस्तूभयाश्रय: ।।

(भाग.पुरा. २।६।१८-२०)

नित्यं याचनको न स्यात् पुनस्तं नैव याचयेत्  प्राणान् अपहरत्येव याचकस्तस्य दुर्मति:
न देवद्रव्यहारी स्याद् विशेषेण द्विजोत्तम: देवस्वं चापि यत्नेन सदा परिहरेत्
तत: पुष्पे शाकोदके काष्ठे तथा मूलफले  तृणेऽदत्ताऽदानमस्तेयं मनु: प्राह प्रजापति:
तिलमुद्गयवादीनां मुष्टि: ग्राह्या पथि स्थिते: क्षुधार्तै: नान्यथा विप्रै: धर्मविद्भि: इति स्थिति:

(ब्रह्मवैवर्तपुराण.२।१६।१६)

## श्रीभागवत

स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे अहैतुक्यप्रतिहता ययाऽऽत्मा सुप्रसीदति ।।६।।
वासुदेवे भगवति भक्तियोग: प्रयोजित: जनयत्याशु वैराग्यं ज्ञानश्च यदहैतुकम् ।।७।।
धर्म: स्वनुष्ठित: पुंसां विश्वक्सेन कथासु य: नोत्पादयेद् यदि रतिं श्रमएव हि केवलम् ।।८।।
धर्मस्य ह्यापवर्ग्यस्य नाऽर्थो अर्थाय उपकल्पते नाऽर्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृत: ।।९।।

कामस्य नेन्द्रियप्रीति: लाभो जीवेत यावता जीवस्य तत्त्वजिज्ञासा न अर्थो यश्चेह कर्मभि: ।।१०।।
(भाग.पुरा.१।२।६–१०)

गृहेषु कूटधर्मेषु पुत्रदारधनार्थधी: न परं विन्दते मूढो भ्राम्यन् संसारवर्त्मसु ।।
(भाग.पुरा.४।२५।६)

अहं ममेति स्वीकृत्य गृहेषु कुमतिर्गृही दध्यौ प्रमदया दीनो विप्रयोग उपस्थिते ।।
(भाग.पुरा.४।२८।१७)

अथ यो गृहमेधीयान् धर्मानेव अवसन् गृहे काममर्थं च धर्मान् स्वान् दोग्धि भूय: पिपर्ति तान् ।।१ ।।
स चापि भगवद्धर्मान् काममूढ: पराङ्मुख: यजते क्रतुभिर्देवान् पितृंश्च श्रद्धयान्वित: ।।२ ।।
तच्छ्रद्धयाक्रान्तमति: पितृदेवव्रत: पुमान् गत्वा चान्द्रमसं लोकं सोमपा: पुनरेष्यति ।।३ ।।
यदा च अहीन्द्रशय्यायां शेतेऽनन्तासनो हरि: तदा लोका लयं यान्ति त एते गृहमेधीयान् ।।४ ।।
ये स्वधर्मान् न दुह्यन्ति धीरा: कामार्थहेतवे ...
(भाग.पुरा ३।३२।१–५)

लोके व्यवायामिषमद्यसेवा नित्यास्तु जन्तोर्न हि तत्र चोदना ।
व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा ।।११।।
धनं च धर्मैकफलं यतो वै ज्ञानं सविज्ञानमनुप्रशास्ति ।
गृहेषु युञ्जन्ति कलेवरस्य मृत्युं न पश्यन्ति दुरन्तवीर्यम् ।।१२।।
यद् घ्राणभक्षो विहित: सुरायास्तथा पशोरालभनं न हिंसा ।
एवं व्यवाय: प्रजया न रत्या इमं विशुद्धं न विदु: स्वधर्मम् ।।१३।।
ये त्वनेवंविदोऽसन्त: स्तब्धा: सदभिमानिन: ।
पशून् द्रुह्यन्ति विस्रब्धा: प्रेत्य खादन्ति ते च तान् ।।१४।।
द्विषन्त: परकायेषु स्वात्मानं हरिमीश्वरम् । मृतके सानुबन्धेस्मिन् बद्धस्नेहा: पतन्त्यध: ।।१५।।
य कैवल्यमसम्प्राप्ता ये चातीताश्च मूढताम् । त्रैवर्गिका ह्यक्षणिका आत्मानं घातयन्ति ते ।।१६।।
एत आत्महनोऽशान्ता अज्ञाने ज्ञानमानिन: । सीदन्त्यकृतकृत्या वै कालध्वस्तमनोरथा: ।।१७।।
हित्वात्यायासरचिता गृहापत्यसुहृच्छ्रिय: । तमो विशन्त्यनिच्छन्तो वासुदेवपराङ्मुखा ।।१८।।
(भाग.पुरा. ११।५।११–१८)

# भगवद्‌गीता

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मण: शरीरयात्राऽपि च ते न प्रसिद्ध्येद् अकर्मण: ।।८ ।।
यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धन:। तदर्थं कर्म कौन्तेय! मुक्तसंग: समाचर ।।९ ।।
सहयज्ञा: प्रजा: सृष्ट्वा पुरोवाच प्रजापति: । अनेन प्रसविष्यध्वम् एष वोऽस्त्विष्टकामधुक् ।।१०।।
देवान् भावयतानेन ते देवा भावयन्तु व:। परस्परं भावयन्त: श्रेय: परमवाप्स्यथ ।।११ ।।
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविता: । तै: दत्तान् अप्रदायैभ्यो यो भुंक्ते स्तेन एव स: ।।१२ ।।
(भग.गीता.३।८–१२)

ब्रह्मार्पणं ब्रह्म हविर् ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ।।२४ ।।
श्रौत्रादीन् इन्द्रियाण्यन्ये संयमाग्निषु जुह्वति। शब्दादीन् विषयान् अन्ये इन्द्रियाग्निषु जुह्वति ।।२६ ।।
सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपते ।।२७।।
(भग.गीता.४।२४,२६–२७)

काम्यानां कर्मणां न्यास: सन्यासं कवयो: विदु: । सर्वकर्मफलत्यागं प्राहु: त्यागं विचक्षणा: ।।
(भग.गीता.१८।२)

त्याज्यं दोषवद् इत्येके कर्म प्राहु: मनीषिण: । यज्ञदानतप: कर्म न त्याज्यम् इति चापरे ।।
(भग.गीता.१८।३)

यज्ञदानतप:कर्म न त्याज्यं कार्यमेव तत् । यज्ञदानतप:कर्म पावनानि मनीषिणाम् ।।५।।
एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च । कर्तव्यानीति मे पार्थ! निश्चितं मतमुत्तमम् ।।६।।
नियतस्य तु सन्न्यास: कर्मणो नोपपद्यते । मोहात् तस्य परित्याग: तामस: परिकीर्तित: ।।७।।
दु:खम् इत्येव यत् कर्म काय–क्लेश–भयात् त्यजेत् । स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ।।८।।
कार्यम् इत्येव यत् कर्म नियतं क्रियतेऽर्जुन! सङ्गं त्यक्त्वा फलं चैव स त्याग: सात्त्विको मत: ।।९।।
(भग.गीता.१८।५–९)

श्रेयान् स्वधर्मो विगुण: परधर्मात् स्वनुष्ठितात् । स्वभावनियतं कर्म कुर्वन् नाप्नोति किल्बिषम् ।।४७।।
सहजं कर्म कौन्तेय! सदोषमपि न त्यजेत् । सर्वारंभा हि दोषेण धूमेन अग्निरिवावृता: ।।४८।।
(भग.गीता.१८।४८)

अफलाकांक्षिभिर् यज्ञो विधिदृष्टो य इज्यते । यष्टव्यमेवेति मन: समाधाय स सात्त्विक: ।।११।।
अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् । इज्यते भरतश्रेष्ठ! तं यज्ञं विद्धि राजसम् ।।१२।।
विधिहीनम् असृष्टान्नं मन्त्रहीनम् अदक्षिणम् । श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ।।१३।।

दातव्यम् इति यद् दानम् दीयते अनुपकारिणे । देशे काले च पात्रे च तद् दानं सात्त्विकं स्मृतम् ।।२०।।
यत्तु प्रत्युपकारार्थं फलम् उद्दिश्य वा पुन: । दीयते च परिक्लिष्टं तद् दानं राजसं स्मृतम् ।।२१।।
अदेशकाले यद् दानम् अपात्रेभ्यश्च दीयते । असत्कृतम् अवज्ञातं तत् तामसम् उदाहृतम् ।।२२।।
(भग.गीता.११-१३,२०-२२)

श्रद्धया परया तप्तं तपस् तत्त्रिविधं नरै: । अफलाकांक्षिभिर् युक्तै: सात्त्विकं परिचक्षते ।।१७।।
सत्कारमानपूजार्थं तपो दम्भेन चैव यत् । क्रियते तदिह प्रोक्तं राजसं चलम् अध्रुवम् ।।१८।।
मूढग्राहेण आत्मनो यत्पीडया क्रियते तप: । परस्य उत्सादनार्थं वा तत्तामसम् उदाहृतम् ।।१९।।
(भग.गीता.१७।१७-१९)

आपूर्यमाणम् अचलप्रतिष्ठितं समुद्रमाप: प्रविशन्ति यद्वत् ।
तद्वत् कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी।।
(भग.गीता.२।७०)